लम्बनं, क्ली, (लम्बते इति । लम्ब + ल्युः ।) नाभिलम्बितकण्ठिकादिः । तत्पर्य्यायः । ललन्तिका २ । इत्यमरः ॥ लम्बते लम्बनं नन्द्यादित्वादनः । इति तट्टीकायां भरतः ॥ (लम्ब + भावे ल्युट् ।) लम्बशब्दार्थश्चात्र ॥

लम्बनः, पुं, (लम्बते इति । लम्ब + ल्युः ।) कफः । इति शब्दचन्द्रिका ॥

लम्बबीजा, स्त्री, (लम्बानि बीजानि यस्याः ।) सैंहलीपिप्पली । इति राजनिर्घण्टः ॥

लम्बमानं, त्रि, लम्बायमानवस्तु । लम्बधातोः कर्त्तरि शानच्प्रत्ययेन निष्पन्नम् ॥

लम्बा, स्त्री, लक्ष्मीः । गौरी । तिक्ततुम्बी । इति मेदिनी । बे, ६ ॥ दक्षकन्याविशेषः । यथा,—

"अरुन्धतीं वसुं यामीं लम्बां भानुं मरुत्वतीम् ।
सङ्कल्पाञ्च मुहूर्त्ताञ्च साध्यां विश्वाञ्च भारत ।
मनवे दक्षपुत्राय दश एता ददौ प्रभुः ॥"

इति हरिवंशे ऋषिपत्निस्थापनम् ॥

हिमालयकन्याविशेषः । यथा,—

"ततस्तद्वचनः श्रुत्वा देवीलम्बामथाब्रवीत् ।
गच्छस्व लम्बे शीघ्रं त्वं वाद्यसंरचनं कुरु ॥
ततो योगं समाधाय अट्टहासा हिमवत्सुता ।
छायास्येकस्य तद्रूपं दर्शयत् पार्श्वमागता ॥
सान्तर्द्धानमुपागम्य त्यक्ता सा वाससी पुनः ।
परित्राणाय वाद्यस्य विजयाधिष्ठिता ततः ॥
प्रमुखे वासुदेवस्य दिग्वासाः कोट्टवी स्थिता ।"

इति महाभारते हरिवंशे वाद्ययुद्धम् ॥

लम्बिका, स्त्री, (लम्बते या । लम्ब + ण्वुल् । टापि अत इत्वम् ।) तालूर्द्ध्वस्थजिह्वा । तत्पर्य्यायः । घण्टिका २ । इति राजनिर्घण्टः ॥ सुधास्रवा ३ गलशुण्डिका ४ । इति हेमचन्द्रः ॥ अलिजिह्वा ५ अलिजिह्विका ६ । इति शब्दरत्नावली ॥

लम्बितः, त्रि, (लम्ब + क्तः ।) स्रंसितः । (यथा, गीतगोविन्दे । १२ । १८ ।

"त्वदधरचुम्बनलम्बितकज्जलमुज्ज्वलय प्रिय लोचने ।")

शब्दितः । इति लबधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम् । लम्बमानमाल्यादिश्च ॥ (यथा, महाभारते । ३ । १५७ । ४२ ।

"वडिशोऽयं त्वया ग्रस्तः कालसूत्रेण लम्बितः ॥")

लम्बोदरः, पुं, (लम्बमुदरं यस्य ।) गणेशः । इत्यमरः ॥ (यथा, आर्य्यासप्तशत्याम् । १६८ ।

"गतिगञ्जितवरयुवतिः करी कपोलौ करोतु मदमलिनौ ।
मुखबन्धमात्रसिन्धुर लम्बोदर किं मदं वहसि ॥"

नृपविशेषः । इति भागवतम् । १२ । १ । २२ ॥) औदरिके, त्रि । इति हेमचन्द्रः ॥ (यथा, कथासरित्सागरे । ७० । १०२ ।

"ततो लम्बोदरेणेत्थं पुंसारोपितबाहुकः ।
सम्पादितः स यातस्तद्वनं केशरिणीकृते ॥")

लम्बोष्ठः पुं, (लम्ब ओष्ठो यस्य । ओत्वोष्ठयोः समासे वा । इति साधुः ।) उष्ट्रः । इति राजनिर्घण्टः ॥ लम्बमानौष्ठयुक्ते, त्रि । (क्षेत्रपालदेवताविशेषः । यथा, प्रयोगसारे क्षेत्रपालप्रकरणे ।

"युगान्तो वाह्यकश्चाथ लम्बोष्ठो वसवस्तथा ।")

लम्बौष्ठः, पुं, (लम्ब ओष्ठो यस्य ।) उष्ट्रः । इति त्रिकाण्डशेषः ॥ दीर्घोष्ठविशिष्टे, त्रि ॥

लम्भनं, क्ली, प्रतिलम्भः । इति हेमचन्द्रः ॥ ध्वनिः । लभि इ शब्दे इत्यस्मात् भावेऽनट् (ल्युट्) प्रत्ययेन निष्पन्नमिति ॥

लम्भा, स्त्री, (लभते इति । लभ इ ङ शब्दे + अच् । टाप् ।) वाटशृङ्खला । इति हारावली ॥

लय, ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ, लयते । इति दुर्गादासः ॥

लयः, पुं, (ली + अच् ।) विनाशः । संश्लेषः । तौर्य्यत्रिकस्य साम्यम् । इति मेदिनी । ये, ५२ ॥ प्रलयः । इति शब्दरत्नावली ॥ * ॥ अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर्निद्रा । इति श्रीपरमहंससदानन्दयोगीन्द्रकृतवेदान्तसारः ॥ तत्राद्यं विघ्नं लययति लयस्तावदिति । लयो द्विविधः । चिरकालमुक्ताष्टाङ्गसहितनिर्विकल्पकसमाध्यभ्यासपाटवेनातितप्तलोहतलक्षिप्तजलबिन्दुवत् तैलरहितदीपकलिकावच्च प्रत्यगभिन्ने परमानन्दे चित्तवृत्तिलयः प्रथमः । द्वितीयस्तु मूर्च्छावस्थावत् आलस्येन चित्तवृत्तेर्बाह्यशब्दादिविषयग्रहणानादरे सति प्रत्यगात्मस्वरूपानवभासनात् वृत्तेस्तब्धीभावलक्षणनिद्रारूपः । इति श्रीनृसिंहसरस्वतीकृतसुबोधिन्याख्या तट्टीका ॥ गीतवाद्यपादन्यासानां क्रियाकालयोः परस्परं समता लयः । लीयन्ते श्लिष्यन्तेऽनेनेति लयन्ति प्रजन्ति साम्यं गीतादयोऽनेनेति वा लयः । ली ङ य ओ श्लिषि लय गत्यां वा अल् । इत्यमरटीकायां भरतः ॥ * ॥ लयस्थानविवर्ज्जनं गायकस्य चतुर्द्दशदोषान्तर्गतदोषविशेषो यथा,—

"शङ्कितं भीतमुत्कृष्टमव्यक्तमनुनासिकम् ।
काकस्वरः शिरःकम्पो लयस्थानविवर्ज्जितम् ॥
विस्वरं विरसञ्चैव विश्लिष्टं विषमाहतम् ।
व्याकुलं तालहीनञ्च गातुर्दोषाश्चतुर्दश ॥" * ॥

अथ लयाः । हृदि स्थितिः कण्ठस्थितिः कपालस्थितिरिति लयत्रयम् । अपरे तु ।

"द्विपदी स्यादलतिका भञ्जिका छिन्नखण्डिका ।
वामभुवस्ततश्छिन्ना खण्डधारा फड्ककः ॥
जम्भट्टिका कलतिकः खण्डकः खुरिकस्तथा ।
कथितश्चतुरस्रोऽर्द्धचतुरस्रोऽथ नर्त्तकः ॥
त्र्यस्रः षट्यान्दोलनाचक्रष्टा नन्दघटीत्यपि ।
कादम्बचर्व्वरी चट्टा मिश्रोऽर्द्धवनिता ततः ॥
अतिचित्रः समयश्च वलितोऽर्द्धदलस्तथा ।
आविद्धस्तु टङ्कवकस्ततश्चित्रविचित्रकौ ॥
आन्ध्री विकृतधावा च सुकुलोऽथ विलोलकः ।
रमणीयस्ततश्चैव करकण्टकसंज्ञकः ॥
चत्वारिंशदिमे प्रोक्ता लया लयविशारदैः ।
लयेन वश्यो भगवान् लये लीनो जनार्द्दनः ॥"

इति संगीतदामोदरः ॥

(त्रि, आचरणात्मकम् । इति श्रीधरस्वामी ॥ यथा, भागवते । ११ । २५ । १५ ।

"यदा जयेद्रजः सत्त्वं तमो मूढं लयं जडम् ।
युज्येत शोकमोहाभ्यां निद्रया हिंसया शया ॥"

क्ली, लामज्जकम् । यथा,—

"लामज्जकं सुनालं स्यादमृणालं लयं लघुः ।
इष्टकापथकं सेव्यं नलदञ्चावदातकम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लयपुत्री, स्त्री, (लयस्य पुत्रीव ।) नर्त्तकी । इति शब्दरत्नावली ॥

लयारम्भः, पुं, (लयस्यारम्भो यस्मात् ।) नटः । इति त्रिकाण्डशेषः ॥

लयालम्बः, पुं, (लयमालम्बते इति । लम्ब + अण् ।) नटः । इति शब्दरत्नावली ॥

लर्ब्ब, गतौ । (भ्वा०-पर०-सक०-सेट् ।) लर्ब्बति । इति सिद्धान्तकौमुदी ॥

लल, ङ क ईप्सायाम् । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-सक०-सेट् ।) क ङ, लालयते । ईप्सा आप्तुमिच्छा । इति दुर्गादासः ॥

लल, त् क ईप्से । इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-पर०-सक०-सेट् ।) ईप्सा इति आपधातोः सनन्तस्य रूपम् । शंस्याद इत्यकारेण सरूपोऽपि अल् कथं न बाध्यते इति चेन्न स्त्रीविहितप्रत्ययैः क्वचित् सरूपोऽपि न बाध्यते इत्यस्य बाध्यत्वात् अन्यथा कारणाकारणमित्यादयोऽपि न स्युः । एवं वक्ष्यमाणेषु व्रीड़ लज्जे इत्यादिष्वपि बोध्यम् । ललयति धनं लोकः । इति दुर्गादासः ॥

ललज्जिह्वः, पुं, (ललन्ती जिह्वा यस्य ।) उष्ट्रः । कुक्कुरः । हिंस्रे, त्रि । इति मेदिनी । बे, १६ ॥ (चलद्रसनायुक्ते च त्रि । यथा, कथासरित्सागरे । १०६ । १२७ ।

"तावच्च प्रकटीभूय भगवान् भैरवाकृतिः ।
उद्वृत्ताक्षिर्ललज्जिह्वः कृत्वा हुंकारमभ्यधात् ॥")

ललत्, त्रि, विलासयुक्तः । उन्मन्थनविशिष्टः । जिह्वाक्रियाविशिष्टः । क्षेपविशिष्टः । ईप्साविशिष्टः । उपसेवाविशिष्टः । भाषणविशिष्टः । कृत्क्षेपविशिष्टः । इति लडधातोः कर्त्तरि शतृप्रत्ययेन डस्य लकारादेशेन च निष्पन्नम् ॥

ललदम्बुः, पुं, (ललत् चलदम्बु यत्र ।) लिम्पाकः । इति जटाधरः ॥ (विषयोऽस्य लिम्पाकशब्दे ज्ञेयः ॥)

ललनं, क्ली, (लल + ल्युट् ।) केलिः । इति हेमचन्द्रः ॥ चालनम् । इति नागोजीभट्टः ॥ यथा,—

"काली करालवदना विनिष्क्रान्तासिपाशिनी ।
विचित्रखट्वाङ्गधरा नरमालाविभूषणा ॥
द्वीपिचर्म्मपरीधाना शुष्कमांसातिभैरवा ।
अतिविस्तारवदना जिह्वाललनभीषणा ॥"

इति देवीमाहात्म्यम् ॥

ललनः, पुं, (लल्यते ईप्स्यते इति । लल + कर्म्मणि ल्युट् ।) बालः । शालः । प्रियालः । इति राजनिर्घण्टः ॥